# Shiva Stuti Devaih Krita

# शिवस्तुतिः देवैः कृता

## Document Information

Text title : Shiva Stuti Devaih Krita

File name : shivastutiHdevaiHkRRitA.itx

Category : shiva, stuti

Location : doc_shiva

Transliterated by : PSA Easwaran

Proofread by : PSA Easwaran

Description/comments : From Saurapurana

Latest update : December 11, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 11, 2021

*sanskritdocuments.org*

# शिवस्तुतिः देवैः कृता

(सौरपुराणे ६१-अध्यायान्तर्गतं)

देवा ऊचुः-
ॐ नमः परमेशाय त्रिनेत्राय त्रिशूलिने ।
विरूपाय सुरूपाय पञ्चास्याय त्रिमूर्तये ॥ ३३॥

वरदाय वराहाय कूर्माय च मृगाय च ।
नीलालकशिखण्डाय मण्डलेशाय ते नमः ॥ ३४॥

विश्वमानाय विश्वाय विश्वेशायाऽऽत्मरूपिणे ।
कालघ्नाय मखघ्नाय अन्धकघ्नाय वै नमः ॥ ३५॥

नमो मन्त्राय जप्याय कोटिजाप्याय ते नमः ।
ध्यानाय ध्येयरूपाय ध्येयध्यानात्मने नमः ॥ ३६॥

ईशोऽनीशस्त्वमेवेश अन्तोऽनन्तस्त्वमेव च ।
अव्ययस्त्वं व्ययश्चैव जन्माजन्म त्वमेव च ॥ ३७॥

नित्यानित्यस्त्वमेवेश धर्माधर्मस्त्वमेव च ।
गुरुस्त्वमगुरुर्देव वीजं वाऽबीजमेव च ॥ ३८॥

कालस्त्वमसि लोकानामकालः परिगीयसे ।
बलस्त्वमबलश्चैव प्राणश्चाप्राण एव च ॥ ३९॥

साक्षी त्वं कर्मणां देव तथाऽसाक्षी महेश्वर ।
शास्ताऽशास्ता विरूपाक्ष ध्रुवश्चाध्रुव एव च ॥ ४०॥

संसारी त्वं हि जन्तूनामसंसारी त्वमेव च ।
गोप्ता त्वं सर्वभूतानां नास्ति गोप्ता तवेश्वरः ॥ ४१॥

जीवस्त्वं जीवलोकस्य जीवस्तेऽन्यो न विद्यते ।
न्यूनातिरिक्तभावेन त्वमायुश्च शरीरिणाम् ॥ ४२॥

देहिनां शङ्करस्त्वं हि न चान्यस्तव शङ्कर ।
अरुद्रस्त्वं महादेव रुद्रस्त्वं घोरकर्मणाम् ॥ ४३॥

देवानां च महादेवो महांस्त्वत्तो न विद्यते ।
कामस्त्वं भविनां सर्वकामदस्त्वं जगत्पते ॥ ४४॥

अजेयो जयिनां श्रेष्ठो जयरूपस्त्वमेव हि ।
पुराणपुरुषस्त्वं हि पुराणोऽन्यो न विद्यते ॥ ४५॥

व्यालयज्ञोपवीताय सरोजाङ्काय ते नमः ।
नमोऽस्तु नीलग्रीवाय शितिकण्ठाय मीढुषे ॥ ४६॥

नमः कपालहस्ताय पाशहस्ताय दण्डिने ।
नमो देवाधिदेवाय नमो नारायणाय च ॥ ४७॥

ऊर्ध्वमार्गप्रणेत्रे च नमस्ते ह्यूर्ध्वरेतसे ।
क्रोधिने वीतरागाय गजचर्मावगुण्ठिने ॥ ४८॥

नमो ब्रह्मशिरोघ्नाय नमस्ते रुक्मरेतसे ।
नमश्चण्डाय धीराय कमण्डलुनिषङ्गिणे ॥ ४९॥

नमः प्रचण्डवेगाय क्रोधचण्डाय ते नमः ।
वरेण्याय शरण्याय ब्रह्मण्यायाम्बिकापते ॥ ५०॥

सर्वानुग्रहकर्ता त्वं धनदाय नमो नमः ।
नमः संसारपोताय आणिमादिप्रदायिने ॥ ५१॥

ज्येष्ठसामादिसंस्थाय। रथन्तराय ते नमः ।
त्रिगाथाय त्रिमात्राय त्रिमूर्ते त्रिगुणात्मने ॥ ५२॥

त्रिवेदिने त्रिसन्ध्याय त्रिशून्याय त्रिवर्मणे ॥

त्रिदेहाय त्रिकालाय त्रिशक्तिव्यापिने नमः ॥ ५३
शक्तित्रयविहीनाय शक्तित्रययुताय च ।
शक्तित्रयात्मरूपाय शक्तित्रयधराय च ॥ ५४॥

योगीशाय विषघ्नाय विजयाय नमो नमः ।
नमस्ते हरिकेशाय लोकपालाय दण्डिने ॥ ५५॥

हलीशाय प्रमेयाय कुलीशाय तु चक्रिणे ।
नमो बिन्दुविसर्गाय नादायानादधारिणे ॥ ५६।

नाडीस्थाय च नाड्याय नाडीवाहाय वै नमः ।
नमो गायत्रीनाथाय गायत्रीहृदयाय ते ॥ ५७॥

नमो गायत्रीगोप्त्रे च गायत्र्याय नमो नमः ॥

य इदं पठते स्तोत्रं गीर्वाणैः समुदीरितम् ॥ ५८
यावज्जीवकृतैः पापैर्मुक्तो याति परां गतिम् ।
एवं स्तुतः सुरैः शम्भुः प्रसन्नो वरदोऽभवत् ॥ ५९॥

इति सौरपुराणे एकषष्ठितमोऽध्यायान्तर्गता देवैः कृता
शिवस्तुतिः समाप्ता ।

Encoded and proofread by PSA Easwaran

*Shiva Stuti Devaih Krita*

pdf was typeset on December 11, 2021

Please send corrections to *sanskrit@cheerful.com*